इति शाकन् ।) शिवः । इति मेदिनी । के, १२६ । गुहश्च । इति हेमचन्द्रः ॥

वराकः, त्रि, ( वृ + "जल्पभिक्षेति ।" ३ । २ । १५५ । इति षाकन् ।) शोचनीयः । इति मेदिनी । के, १२६ ॥ अधमः । इति शब्दमाला ॥ (यथा, मुकुन्दमालायाम् । १७ ।
"नाथे श्रीपुरुषोत्तमे त्रिजगतामेकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति ।
यं कञ्चित् पुरुषाधमं कतिपयग्रामेशमल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका
वयम् ॥")

वराङ्गं, क्ली, (वरमङ्गानाम् ।) मस्तकम् । गुह्यम् । इत्यमरः । ३ । ३ । २६ ॥ गुडत्वक् । योनिः । इति त्रिकाण्डशेषः ॥ श्रेष्ठावयवे, च ॥ ( वरा-ण्यङ्गान्यस्य ।) तद्युक्ते, त्रि ॥ (चोचम् । यथा,
"त्वक्पत्रञ्च वराङ्गं स्याद्भृङ्गञ्चोचं तथोत्-
कटम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

वराङ्गः, पुं, ( वराणि स्थूलान्यङ्गानि यस्य ।) हस्ती । इति त्रिकाण्डशेषः । विष्णुः । यथा,—
"सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ॥"
इति तस्य सहस्रनामस्तोत्रम् ॥

वराङ्गकं, क्ली, ( वरमङ्गमस्य । कप् । ) गुडत्वक् । इत्यमरः । २।४।१३४ ॥ श्रेष्ठावयवयुक्ते, त्रि ॥

वराङ्गना, स्त्री, ( वरा श्रेष्ठा अङ्गना । ) अति-प्रशस्ताङ्गयुक्ता स्त्री । यथा,—
"शिरः सपुष्पं चरणौ सुपूजितौ
वराङ्गनासेवनमल्पभोजनम् ।
अनग्नशायित्वमपर्व्वमैथुनं
चिरप्रनष्टां श्रियमानयन्ति षट् ॥"
इति लक्ष्मीचरित्रम् ॥

वराङ्गरूपोपेतः, त्रि, ( अङ्गानां रूपाणि अङ्ग-रूपाणि । वराणि अङ्गरूपाणि तैरुपेतः ।) श्रेष्ठरूपयुक्तः । सुन्दर इत्यर्थः । तत्पर्य्यायः । सिंहसंहननः १ । इत्यमरः ॥

वराङ्गी, स्त्री, ( वरमङ्गमन्तरवयवो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

वराङ्गी, [ न् ] पुं, ( वराङ्गमस्यास्तीति । इनिः ।) अम्लवेतसः । वराङ्गश्चाम्लवेतसं इति वा पाठः । इति रत्नमाला । श्रेष्ठाङ्गयुक्ते, त्रि ॥

वराटः, पुं, ( वरं मन्दमटतीति । अट् + कर्म्मणि अण् ।) कपर्द्दकः । इति राजनिर्घण्टः ॥ ( अस्य शोधनादिविषयो यथा,—
"भूगर्त्ते च समे शुद्धे पात्रीं स्थापयेत् सुधीः ।
तुषैश्च पूरयेत्तस्याः किञ्चिदर्धं भिषग्वरः ॥
वराटैः पूरितां मूषां तन्मध्ये विनिवेशयेत् ।
कारीषाग्निं ततो दद्यात् पालिका यत्नसुत्त-
मम् ।
अनेन म्रियते नूनं वराटः सर्व्वरोगजित् ॥" * ॥
अन्यच्च ।
"वराटं तत्र चाङ्गेरी जम्बीराणां रसेन वा ।
अष्टयामपि चाम्लानां यावत् पीतं न गच्छति ।
पश्चादुद्धृत्य प्रक्षाल्य गृह्णीयाच्च वराटकम् ॥"
इति वराटशुद्धिः । * ।
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधि-कारे । ) रज्जुः । यथा । रज्जुः शुल्वा वराटो ना । इति स्त्रीकाण्डे रत्नकोषः । इत्यमर-टीकायां भरतः ॥

वराटकः, पुं स्त्री, ( वराट् + स्वार्थे कन् । ) कप-र्द्दकः । इत्यमरः ॥ कडि इति भाषा । तस्य संख्याभेदेन संज्ञाभेदा यथा,—
"वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इवावगम्यो
द्रम्मैस्तथा षोडशभिश्च निष्कः ॥"
इति लीलावती ॥ * ॥
अपि च । ताम्रिकः कार्षिकः पणः । इति याज्ञवल्क्यवचनेन गुञ्जाः पञ्चाद्यमाषकस्ते षोडशाक्षः कर्षोऽस्त्री । इत्यमरसिंहोक्तेन च अशीतिरत्तिकापरिमितताम्रे पणशब्दः सङ्के-तितः स च तावत्संख्यकवराटकैर्लभ्यते इति वराटकैरपि तथा व्यवहारः । एतन्मूलकं भविष्यमत्स्यपुराणयोर्व्वचनं यथा,—
"अशीतिभिर्व्वराटकैः पण इत्यभिधीयते ।
तैः षोडशैः पुराणं स्याद्रजतं सप्तभिस्तु तैः ॥"
इति प्रायश्चित्ततत्त्वम् ॥ * ॥
ते च दक्षिणार्थं विधीयन्ते । यथा,—
"हतमश्रोत्रियं दानं हतो यज्ञस्त्वदक्षिणः ।
तस्मात् पणं काकिणीं वा फलं पुष्पमथापि
वा ।
प्रदद्यात् दक्षिणां यज्ञे तथा स सफलो भवेत् ॥"
इति शुद्धितत्त्वम् ॥

वराटकः, पुं, ( वराट एव । स्वार्थे कन् । ) रज्जुः । पद्मबीजम् । इति मेदिनी । के, २०२ ॥

वराटकरजाः, [ स् ] पुं, ( वराटक इव रजो यस्य । ) नागकेशरवृक्षः । इति शब्दमाला ॥

वराटिका, स्त्री, ( वराट् + स्वार्थे कन् । टाप् । अत इत्वञ्च ।) कपर्द्दकः । इत्यमरटीकायां भरतः राजनिर्घण्टश्च ॥ ( यथा, नैषधे ।२।८८।
"मधुकप्रसूनविब्वराटिका
गणनाटनकारककर्कटोत्करः ॥")
तुच्छवाचिका च । यथा,—
"प्रयागे मज्जते येन तस्य गङ्गा वराटिका ॥"
इत्युद्भटः ॥

वराणः, पुं, ( व्रियते इति । वृ + युच् । पृषो-दरात् दीर्घः । ) इन्द्रः । इति त्रिकाण्डशेषः । वरुणवृक्षः । इति शब्दरत्नावली ॥

वराणसी, स्त्री, (वाराणसी पृषोदरादित्वात् साधु ।) काशी । यथा,—
"काशी वराणसी वाराणसी शिवपुरी च
सा ॥"
इति हेमचन्द्रः ॥

वरादनं, क्ली, ( वरै राजभिरद्यते इति । अद् + ल्युट् । ) राजादनम् । इति शब्दचन्द्रिका ॥

वराभिधः, पुं, अम्लवेतसः । इति राजनिर्घण्टः ॥ ( वरा अभिधा यस्य । ) श्रेष्ठनामा च ॥

वराम्रः, पुं, ( वरः श्रेष्ठः आम्रोऽत्र । रस्य लत्वम् । ) करमर्द्दः । इति रत्नमाला ॥ करात्म इति वा पाठः ॥

वरारकं, क्ली, (वरं श्रेष्ठं धनिनं ऋच्छति गच्छति । ऋ + ण्वुल् ।) हीरकम् । इति हेमचन्द्रः । ४ । १३१ ॥ (गुणादयोऽस्य हीरकशब्दे ज्ञातव्याः ॥)

वरारोहः, पुं, ( हस्तिन उच्चत्वात् व्यावृतपृष्ठ-त्वाच्च वर आरोहो यत्र ।) हस्त्यारोहः । अव-रोहः । इति विश्वः ॥

वरारोहा, स्त्री, (वर आरोहो नितम्बो यस्याः ।) उत्तमा स्त्री । इत्यमरः । २ । ६ । ४ ॥ ( यथा, महानिर्व्वाणतन्त्रे । ४ । ४७ ।
"यदा तु वैदिकी दीक्षा दीक्षा पौराणिकी
तथा ।
न स्थास्यति वरारोहे ! तदैव प्रबलः कलिः ॥")
कटिः । इति हेमचन्द्रः ॥

वरालिका, स्त्री, ( वरा आलिका सखी जयादि-र्यस्याः । ) दुर्गा । इति त्रिकाण्डशेषः ॥

वराशिः, पुं, स्थूलवस्त्रम् । मोटा कापड इति भाषा । तत्पर्य्यायः । स्थूलशाटकः २ । इत्य-मरः ॥ वराशिः ३ स्थूलशाटकम् ४ स्थूल-शाटिका ५ । इति तट्टीकायां भरतः ॥ स्थूल-पट्टाकः ६ । इति शब्दरत्नावली ॥ वराशि ७ । क्लीवमिति जटाधरः ॥

वरासनं, क्ली, ( वरायै दुर्गायै अस्यते क्षिप्यते दीयते इति यावत् । अस् + ल्युट् । ) ओड्-पुष्पम् । इति शब्दमाला ॥ (वरमासनमिति ।) उत्तमासनञ्च ॥

वरासनः, पुं, ( वरां स्त्रीयां नारीं अस्यति अव-तीति । अस् + ल्युः । ) विड्गः । ( वरानपि जनान् अस्यति दूरीकरोतीति । ) द्वारपालः । इति विश्वः ॥

वरासिः, पुं, ( वरैः श्रेष्ठैः अस्यते क्षिप्यते इति । अस् + इन् । ) स्थूलशाटकः । (वरोऽसिर्यस्य ।) खड्गधरः । इति धरणिः ॥

वरासी, स्त्री, स्नानवासः । इति शब्दमाला ॥

वराहः, पुं, ( वरान् आहन्ति इति दुर्गः । उणा० ४ । ३ । ४६ । हन् + डः । ) पशु-विशेषः । वरा इति भाषा । तत्पर्य्यायः । सूकरः २ घृष्टिः ३ कोलः ४ पोत्री ५ किरिः ६ किटिः ७ दंष्ट्री ८ घोणी ६ स्तब्धरोमा १० क्रोडः ११ भूदारः १२ । इत्यमरः ॥ किरः १३ मुस्तादः १४ मुखलाङ्गलः १५ । इति जटा-धरः ॥ स्थूलनासिकः १६ दन्तायुधः १७ वक्र-वक्त्रः १८ दीर्घतरः १९ आखनिकः २० भूक्षित् २१ बहुसूः २२ । इति शब्दरत्ना-वली ॥ अस्य मांसस्य गुणाः । वृष्यत्वम् । वातघ्नत्वम् । बलवर्द्धनत्वञ्च । इति राजवल्लभः ॥ बहुमूत्रत्वम् । विरूक्षणत्वञ्च । इति तत्रैव पाठान्तरम् । अन्यत् सूकरशब्दे द्रष्टव्यम् ॥ * ॥